स्तोत्र

कृ. नं. ८३

संस्कृत

॥ संध्यारामेश्वर ॥

४१८ । स्तो. १५८

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(१)

अथ संध्याटक्षपति
शीघ्रानुसारेण ॥१॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)

श्रीगणेशायनमः॥ गृह्यपरिशिष्टानुसा
रेण श्रौतःस्मार्तसंध्या लिख्यते॥ ओं केश
वायनमः॥ नारायणायनमः॥ माधवा
यनमः॥ इति त्रिभिः पीत्वा॥ गोविंदायन
मः॥ विष्णवेनमः॥ मधुसूदनायनमः॥ त्रि
विक्रमायनमः॥ वामनायनमः॥ श्रीध
रायनमः॥ हृषीकेशायनमः॥ पद्मनाभा
यनमः॥ दामोदरायनमः॥ संकर्षणायनमः॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2A)

वासुदेवायनमः॥ प्रद्युम्नायनमः॥ अ
निरुद्धायनमः॥ पुरुषोत्तमायनमः॥ अधो
क्षजायनमः॥ नारसिंहायनमः॥ अच्युता
यनमः॥ जनार्द्दनायनमः॥ उपेंद्रायनमः॥ ह
रयेनमः॥ श्रीकृष्णायनमः॥ प्रणवस्य॥ ब्रह्म
ऋषिः॥ अग्निर्देवता॥ दैवीगायत्रीछंदः॥
सप्तानांव्याहृतीनांविश्वामित्रभृगुभरद्वा
जवसिष्ठगोतमकश्यपांगिरसऋषयः॥

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

२
(3)

अग्निर्वायुसूर्यबृहस्पतिवरुणेंद्रविश्वेदे
वादेवताः ॥ गायत्र्युष्णिगनुष्टुब्बृहतीप
ङ्क्तित्रिष्टुप्जगत्यः छंदांसि ॥ गायत्र्या वि
श्वामित्रः सविता गायत्री ॥ ओंकारस्य प्रजाप
तिर्ब्रह्माग्निर्वाय्वादित्या देवता ॥ य
जुर्वेदः ॥ प्राणायामे विनियोगः ॥ ॐ भूः ॥
ॐ भुवः ॥ ॐ स्वः ॥ ॐ महः ॥ ॐ जनः ॥ ॐ
तपः ॥ ॐ सत्यं ॥ ॐ तत्सवितुर्वरेण्यं भ २

(3A)

र्गो देवस्य धीमहि ॥ धियो यो नः प्र चोदयात् ॥
ॐ मा पो ज्योती रसो मृतं ब्रह्म भूर्भुवः सुव
रों ॥ एवं त्रिः ॥ अद्येत्यादि एवंगुण विशेषण
विशिष्टायां पुण्यतिथौ मनोपात दुरितक्ष
यद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रातःसंध्या
मुपासिष्ये ॥ ततो मार्जनं ॥ ॐ आपो हिष्ठा
मयो भुवः ॥ ॐ ता न ऊर्जे दधातन ॥ ॐ महेर
णाय चक्षसे ॥ ॐ यो वः शिवतमो रसः ॥ ॐ
तस्य भाजयते ह नः ॥ ॐ उशतीरिव मातः

४ आपो हिष्ठेति तृचस्य आंबरीषः सिंधुद्वीप आपो गायत्री ॥ मार्जने वि०

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(५)

र्ः॥ ॐ तस्मा अरंगमाम वः॥ ॐ यस्य क्षयाय
जिन्वथ॥ ॐ आपो जनयथा च नः॥ ९॥ सूर्य
श्चेति मंत्रस्य॥ विष्णुऋषिः॥ सूर्यमन्युमन्यु
पतयो देवताः॥ प्रकृतिश्छंदः॥ आचमने वि
नियोगः॥ ॐ सूर्यश्च मामन्युश्च मन्युपतय
श्च मन्युकृतेभ्यः॥ पापेभ्यो रक्षंतां॥ यद्रात्र्या
पापमकार्षं॥ मनसा वाचा हस्ताभ्यां॥
पद्भ्यामुदरेण शिश्ना॥ रात्रिस्तदवलुंपतु॥
यत्किंच दुरितं मयि॥ इदमहं माममृतयोनौ॥ ३
सूर्ये ज्योतिषि जुहोमि स्वाहा॥ आचम्य॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5A)

पुनर्मार्जयित्व॥ आपो हिष्ठेतिनवर्चस्यस्त्र कस्य॥
आंबरीषः सिंधुद्वीप आपोगायत्री॥ पंचमी
वर्धमाना॥ सप्तमीप्रतिष्ठा॥ अंत्ये द्वे अनुष्टु
भौ॥ मार्जने विनियोगः॥ ॐ॥१ ॐभूर्भुवः
स्वः॥२ ओंतत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि॥
धियो यो नः प्रचोदयात्॥३ ॐ आँ हिष्ठाम पो
यो भुवस्तान ऊर्जे दधातन॥ महे रणाय चक्ष
से॥४ ॐ यो वः शिवतमो रसस्तस्य भाजयते
ह नः॥ उशतीरिव मातरः॥ ५ तस्मा अरंग
माम वो यस्य क्षयाय जिन्वथ॥ आपो जनय

(5)

४

थान्वनः॥६ ॐ शंनोदेवीरभिष्टय आपोभवं
तुपीतये॥ शंयोरभिस्रवंतुनः॥७ ॐ ईशानावा
र्याणांक्षयंतीश्चर्षणीनां॥ अपोयाचामिभेषजं॥
८॥ ॐ अप्सुमेसोमोअब्रवीदंतर्विश्वानि
भेषजा॥ अग्निंचविश्वशंभुवं॥ ९ ॐ आपः
पृणीतभेषजंवरूथंतन्वेऽमम॥ ज्योक्चसू
र्यंदृशे॥१०॥ ॐ इदमापःप्रवहतयत्किंचदु
रितंमयि॥ यद्वाहमभिदुद्रोहयद्वाशेपउता
नृतं॥११ ॐ आपोअद्यान्वचारिषंरसेनस
मगस्महि॥ पयस्वानग्नआगहितंमासंसृज ४

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(5A)

गवर्चसा॥१२ओं मापो ज्योतीरसोमृतं ब्र
ह्मभूर्भुवः स्वरोम्॥१३॥ आत्मानं परि षिं
चेत्॥ ऋतं चेति तृचस्य॥ ओं ~~ऋतं च सत्यं चाभी~~
~~द्धात्तपसो~~॥ अघमर्षण ऋषिः॥ भाव
वृतं देवता॥ अनुष्टुप् छंदः॥ अघमर्षणे
विनियोगः॥ ओं ऋतं च सत्यं चाभीद्धात्तप
सोऽध्यजायत॥ ततो रात्र्यजायत ततः समु
द्रो अर्णवः॥ समुद्रादर्णवादधि संवत्सरो
अजायत॥ अहोरात्राणि विदधद्विश्वस्य
मिषतो वशी॥ सूर्याचंद्रमसौ धाता यथापूर्व

(6)

मकल्पयत्॥ दिवंच पृथिवींचांतरिक्षमथो स्वः॥
५ द्रुपदादिवेन्मुमुचानः स्विन्नः स्नात्वी मलादिव॥
पूतं पवित्रेणेवाज्यमापः शुंधंतु मैनसः॥ आ
चम्य॥ गायत्र्या विश्वामित्र ऋषिः सविता गाय
त्री॥ अर्घ्यदाने विनियोगः॥ ॐ भूर्भुवः
स्वः॥ तत्सवितुर्वरेण्यं भर्गो देवस्य धीम
हि॥ धियो यो नः प्रचोदयात्॥ श्रीसूर्या
येदमर्घ्यं नमः॥ एवं त्रिः॥ एवं तिष्ठन्नर्घ्यं ५
त्रयं दद्यात्॥ तत्र कारिका॥ तिष्ठन्नर्घ्य
त्रयं दद्यात् त्रिषु संध्यासु बद्धकः॥ प्रातर्म

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(6A)

ध्याङ्गयोरप्कस्मा याङ्को भुविनिक्षिपेत् ।।
असावादित्यो ब्रह्मेति । प्रदक्षिणं परीयत् ।।
परिषिच्य । अपउपस्पृश्य ।। भूर्भुवः स्वरिति
दर्भेषूपविश्य ।। प्रणवस्येत्यादि पूर्ववत्प्रा
णायामं कृत्वा । जपगायत्र्या मावे ।। गायत्र्या वि
श्वामित्रः सविता गायत्री ।। जपे विनियोगः ।
तत्सवितुर्हृदयाय नमः । वरेण्यं शिरसे स्वा
हा ।। भर्गो देवस्य शिखायै वषट् । धीमहि क
वचाय हुं । धियो यो नः नेत्रत्रयाय वौषट् ।।
प्रचोदयात् अस्त्राय फट् ।। अथध्यानं ।।

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(७)

६ त्यग्यजुःसामा त्रिपदा तिर्यगूर्ध्वाधरदिक्षु
षट्कुक्षिः पंचशिरस्काग्निमुखी विष्णु
हृदया ब्रह्मा शिरस्का रुद्रशिखा दंडकम
उत्ववक्षस्त्रा म[illegible]करा चतुर्भुजा भुभव
णांभुस्त्रांबरानु [illegible] गाभरणा शुभ्रस्व
ड्र सह स्त्र प्रभा स[illegible] वमा पापि मिमां देवीगा
यत्री ध्यायेत ॥ आगच्छ वरदे देवि ज
पे मे सान्निधो भव ॥ गायंतं त्रायसे यस्मा ६
द्गायत्री त्वं ततः स्मृता ॥ १०८ गायत्री जपः
॥ जपांते उपस्थाय ॥ जातवेदसे मारीन्च ॥

"Joint project of the Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(7A)

कश्यपो जातवेदा अग्निस्त्रिष्टुप् ॥ तच्छंयोः
शंयुर्विश्वेदेवाः शक्करी ॥ नमो ब्रह्मणे प्रजा
पतिर्विश्वेदेवा जगती ॥ उपस्थाने विनियोगः ॥
ॐ जातवेदसे सुनवाम सोममरातीयतो नि
दहाति वेदः ॥ स नः पर्षदति दुर्गाणि विश्वा ना
वेव सिंधुं दुरितात्यग्निः ॥ ॐ तच्छंयोरावृणी
महे गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्ति
रस्तु नः स्वस्तिर्मानुषेभ्यः ॥ ऊर्ध्वं जिगातु
भेषजं शं नो अस्तु द्विपदे शं चतुष्पदे ॥ ॐ न
मो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै न

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8)

म ॐ ओषधीभ्यः। नमो वाचे नमो वाचस्पतये
नमो विष्णवे महते करोमि॥ प्राच्यै दिशे नमः।
इंद्राय नमः॥ आग्नेय्यै दिशे नमः॥ अग्नये न
मः॥ दक्षिणस्यै दिशे नमः। यमाय नमः॥ नैर्ऋत्यै
दिशे नमः॥ निर्ऋतये नमः॥ प्रतीच्यै दिशे नमः॥
वरुणाय नमः॥ वायव्यै दिशे नमः॥ वायवे नमः॥
उदीच्यै दिशे नमः॥ सोमाय नमः॥ ईशान्यै दिशे
नमः॥ ईश्वराय नमः॥ ऊर्ध्वायै दिशे नमः॥ ब्रह्मणे
नमः॥ अधरायै दिशे नमः॥ अनंताय नमः॥ संध्या
यै नमः॥ गायत्र्यै नमः॥ सावित्र्यै नमः॥ सरस्वत्यै नमः॥
सर्वाभ्यो देवताभ्यो नमः॥ ॐ नमो शिरव रुदो बभ्र

(8A)

म्यांपर्वतमूर्धनि। ब्राह्मणेभ्योभ्यनुज्ञाता गच्छ
देवि यथासुखं॥ भद्रं नो अपि वातय मनः शांतिः शांतिः
शांतिः। आसत्यलोकात् पातालात् आलोकालोकपर्वतात्
ये संति ब्राह्मणा देवाः तेभ्यो नित्यं नमो नमः।
प्रवरान्ते गोत्रमुच्चार्य। नक्षत्रनामशर्माहं भो अभिवादयामि॥ इति प्रातःसंध्या॥ अथ सायंसंध्या लिख्यते॥ अद्येत्यादि० सायंसंध्यामुपासिष्ये॥ पूर्ववन्मार्जयित्वा॥ अग्निश्चेति मंत्रस्य रुद्र ऋषिः। अग्निमन्युमन्युपतयो देवताः। प्रकृतिश्छंदः॥ आचमने

रश्च

८ नेविनियोगः।ॐ अग्निश्चमामन्युश्चमन्युपत
यश्चमन्युकृतेभ्यः।पापेभ्योरक्षंतां।यदन्हा
(१) पापमकार्षं।मनसावाचाहस्ताभ्यां।पद्भ्यामु
दरेण।शिश्ना।अहस्तदवलुंपतु।यत्किंचदु
रितंमयि।इदमहंमाममृतयोनौ।सत्येज्यो
तिषिजुहोमिस्वाहा॥अन्यत्सर्वं प्रातःसं
ध्यावत्॥इतिसायंसंध्या॥अथमाध्यान्हीक
संध्या॥ ॥अथमाध्यान्हीकीसंध्या। ८
मुपासिष्ये।आपोहिष्ठेतिपुनर्वन्मार्जाय
ता।आपःपुनंतिमंत्रस्य।नारायणऋ
षिः।आपोदेवता।अष्टीछंदः।आचमनेवि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(9A)

॥ ॐ आपः पुनंतु पृथिवीं पृथिवी पूता पुनातु मां।
पुनंतु ब्रह्मणस्पति ब्रह्म पूता पुनातु मां॥ यदुच्छिष्ट
मभोज्यं यद्वा दुश्चरितं मम। सर्वं पुनंतु मामापो सतां
च प्रतिग्रहं स्वाहा। आचम्य। पुनः पूर्ववन्मार्जयित्वा
।हंसः शुचिषदादि मंत्रस्य गौतमो वामदेवः सूर्यो ज
गती॥ सूर्यार्घ्यदानं।ॐ हंसः शुचिषद्वसुरंतरिक्षसत्
त्रिः सकृद्वा अर्घ्यप्रदानं॥ उदुत्यमिति त्रयोदशर्च
स्य सूक्तस्य काण्वः प्रस्कण्व ऋषिः। सूर्यो देवता। नवा
द्या गायत्र्यो त्यास्त्रयस्त्रिष्टुभः। उद्यन्नद्येत्यस्य
चारोगघ्न उपनिषदित्याद्यं चोत्तिद्विषघ्नः। चित्रं देवाना
मिति षण्णां

P

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

मांगिरसः कुत्सः सूर्यस्त्रिष्टुप्। तच्चक्षुर्मैत्रावरुणिः स्व
यंभुरउष्णिक्। उपस्थाने वि०। ॐ उदुत्यं जातवेदसं०।१३
(१०) ॐ चित्रं देवानां०।२। ॐ तच्चक्षुर्देव०।१। यद्वा।
उदुत्यं काण्वः प्रस्कण्वः सूर्यो गायत्री। चित्रं देवाना
मांगिरसः कुत्सः सूर्य[illegible]। तच्चक्षुर्मैत्रावरुणिः स्व
यंभुर उष्णिक्। उदुत्यं०।१ चित्रं देवानां०।२ तच्चक्षु०।१
प्रणवस्येत्यादि प्राणायामत्रयादि गायत्रीजपांते ९
प्रातःसंध्यावत्। इति माध्याह्निकी संध्या समाप्ता।
उपस्थानानंतरं गायत्रीजपः। इति समाप्तः

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

त्यभूर्भुवःस्वरोंम्‌॥ पूर्ववत्‌॥आचम्य प्राणानायम्य॥ ॥इति
सायंसंध्यासमाप्तः॥ ॥श्रीगणेशायनमः॥अस्यश्रीरामर
क्षास्तोत्रमंत्रस्य॥बुधकौशिकऋषिः॥श्रीरामचंद्रोदेवता॥
अनुष्टुप्‌छंदः॥सर्वारिष्टशांत्यर्थं श्रीरामरक्षास्तोत्रजपेवि॰॥
चरितंरघुनाथस्यशतकोटिप्रविस्तरं॥एकैकमक्षरंपुंसांमहा
पातकनाशनं॥१॥ध्यात्वानीलोत्पलश्यामंरामंराजीवलोच
नं॥जानकीलक्ष्मणोपेतंजटामुकुटमंडितं॥२॥सासीतूणि
धनुर्बाणपाणिंनक्तंचरांतकं॥स्वलीलयाजगत्रातुमाविर्भू
तमजंविभुं॥३॥रामरक्षांपठेत्प्राज्ञःपापघ्नींसर्वकामदां॥शिरो

the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

 मेराघवःपातुभालंदशरथात्मजः॥ ४ ॥ कौसल्येयोदृशोपातुवि
 श्वामित्रप्रियश्रुती॥ घ्राणंपातुमखत्रातामुखंसौमित्रिवत्सलः॥ ५ ॥
जिह्वांविद्यानिधिःपातुकंठंभरतवंदितः॥ स्कंधौदिव्यायुधःपातु
भुजौभग्नेशकार्मुकः॥ ६ ॥ करौसीतापतिःपातुहृदयंजामदग्न्य
जित्॥ मध्यंपातुखरध्वंसीनाभिंजांबवदाश्रयः॥ ७ ॥ सुग्रीवेशः
कटिंपातुसक्थिनीहनुमत्प्रभुः॥ ऊरूरघूत्तमःपातुरक्षःकुलविना
शकृत्॥ ८ ॥ जानुनीसेतुकृत्पातुजंघेदशमुखांतकः॥ पादौबिभी
षणःश्रीदःपातुरामोखिलंवपुः॥ ९ ॥ एतांरामबलोपेतांरक्षांयः
सुकृतीपठेत्॥ सचिरायुःसुखीपुत्रीविजयीविनयीभवेत्॥ १० ॥ पा 
तालभूतलव्योमचारिणश्छद्मचारिणः॥ नद्रष्टुमपिशक्तास्ते 

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

रक्षितं रामनामभिः ॥११॥ रामेति रामभद्रेति रामचंद्रेति वा स्मर
न् ॥ नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विंदति ॥१२॥ जगज्जैत्रैक
मंत्रेण रामनाम्नाभिरक्षितं ॥ यः कंठे धारयेत्तस्य करस्थाः सर्व
सिद्धयः ॥१३॥ वज्रपंजरनामेदं यो रामकवचं स्मरेत् ॥ अव्या
हताज्ञः सर्वत्र लभते जयमंगलं ॥१४॥ आदिष्टवान्यथा स्वप्ने रा
मरक्षामिमां हरः ॥ तथा लिखितवान् प्रातः प्रबुद्धो बुधकौशि
कः ॥१५॥ रामो दाशरथिः शूरो लक्ष्मणानुचरो बली ॥ काकुत्स्थः पु
रुषः पूर्णः कौसल्यानंदवर्धनः ॥१६॥ वेदांतवेद्यो यज्ञेशः पुराण
पुरुषोत्तमः ॥ जानकीवल्लभः श्रीमानप्रमेयपराक्रमः ॥१७॥ इत्ये
तानि प्रजपेन्नित्यं मद्भक्तः श्रद्धयान्वितः ॥ अश्वमेधायुतं पुण्यं लभते

" Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(१२)

१८

रा· र· नात्रसंशयः॥सन्नध्धः कवची खड्गी चापबाणधरो युवा॥गछन्म
॥१२॥ नोरथोस्माकं रामः पातु सलक्ष्मणः॥१९॥रामाय रामभद्राय रामचंद्रा
य वेधसे॥रघुनाथाय नाथाय सीतायाः पतये नमः॥२०॥राम रामे
ति रामेति रमे रामे मनोरमे॥सहस्रनाम तत्तुल्यं राम नाम वरानने॥
॥२१॥आत्तसज्जधनुषाविषुस्पृशावक्षयाशुगनिषंगसंगि
नौ॥रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्छतां॥२२॥
आरामः कल्पवृक्षाणां विरामः सकलापदां॥अभिरामस्त्रिलो
कानां रामः श्रीमान्स नः प्रभुः॥२३॥तरुणौ रूपसंपन्नौ सुकुमा शेष
रौ महाबलौ॥पुंडरीकविशालाक्षौ चीरकृष्णाजिनांबरौ॥फल ॥१२॥
मूलाशिनौ दांतौ तापसौ ब्रह्मचारिणौ॥पुत्रौ दशरथस्यैतौ भ्रा
॥२४॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(12A)

कुजंतंराममरामेतिमधुरंमधुराक्षरं।।आरुह्यकविताशाखां
वंदेवाल्मिककोकिलं।।२७।।

तरौरामलक्ष्मणौ।।२६।।शरण्येसर्वसत्वानांश्रेष्ठौसर्वधनुष्मतां।।
रक्षःकुलनिहंतारौत्रायेतान्नोरघूत्तमौ।।२६।।मातारामोमत्पि
तारामश्चंद्रःस्वामीरामोमत्सखारामचंद्रः।।सर्वस्वंमेरामचंद्रोदया
लुर्नान्यंजानेनैवजानेनजाने।।२७।।मनोजवंमारुततुल्यवेगंजि
तेंद्रियंबुध्दिमतांवरिष्ठं।।वातात्मजंवानरयूथमुख्यंश्रीरामदूतं
शरणंप्रपद्ये।।२८।। ।।इतिश्रीबुधकौशिकविरचितंश्रीराम
रक्षास्तोत्रंसंपूर्णं।। ।।श्रीरामचंद्रार्पणमस्तु।। ।।श्रीशिवप्रसन्न।।
।।शाके१७४१प्रमाथीनामसंवत्सरे।।चैत्रेमासि।।कृष्णपक्षे।।
।।समाप्तं।। ।।छ।। ।।ः।। ।।छ।। ।।ः।। ।।छ।। ।।

रामंलक्ष्मणपूर्वजंरघुविरंसीतापतिंसुंदरं।।काकुत्स्थंकरु
णार्णवंगुणनिधिंविप्रप्रियंधार्मिकं।।२८।।वळवे

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(13)

॥१३॥

॥इतिरामरक्षासमाप्तः॥श्रीराम॥

श्रीघ
॥१३॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com